# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| कक्षा – शास्त्री-3 (OLD) | प्रश्नपत्रम् – 5 | गुणाः – ५० |
| विषयः – फलितज्योतिषम् | सत्रम् – 6 | समयः – १० तः १२ |
| दिनाङ्कः – १७/०७/२०२१ | सन्दर्भग्रन्थः – सर्वार्थचिन्तामणिः, केरलप्रश्नसङ्ग्रहः | |

**सूचना -** **निम्नलिखितेषु दशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः।**
**प्रत्येकं प्रश्नस्य समानगुणाः। (१०)**

**प्रश्नः १ अधोलिखितेषु द्वयोः पद्ययोः व्याख्या कार्या।**

१ राशिंत्रिधाकृत्य दृकाणमाहुस्तदीशपुत्रेशशुभाधिनाथाः।
युजीन्दुसूर्य्योभवने सवीन्दूनाथौ त्वयुमे भवनस्य चार्द्धे॥

२ भावाः सर्वे शुभपतियुता वीक्षिता वा शुभेशै-
स्तत्तद्भावाः सकलफलदाः पापदृग्योगहीनाः।
पापाः सर्वे भवनपतयश्चेदिहाहुस्तथैव
खेटैः सर्वैः शुभमपि फलं निम्नमूढारिहीनैः॥

३ चन्द्रार्कसंयुक्तहरौ विलग्ने शन्यारदृष्टेक्षिविनाशमाहुः।
शुभाशुभैर्बुद्धदलोचनः स्याच्छुभैर्न दोषः सहितेक्षणाभ्याम्॥

**प्रश्नः २ षड्वर्गविचारः क्रियताम्।**

**प्रश्नः ३ लग्नभावफलं लिखत।**

**प्रश्नः ४ कयोरपि द्वयोः पद्ययोः व्याख्या कार्या।**

१ नाशस्थितौ सोदरनाथभौमौ पापेक्षितौ सोदरनाशमाहुः।
पापर्क्षगौ पापसमागमौ वा भ्रातॄन् समासाद्य विनाशहेतुः॥

२ लग्नपुत्राधिपौ युक्तावन्योन्यं वापि वीक्षितौ।
क्षेत्रे परस्परस्थौ वा पुत्रप्राप्तिर्न संशयः॥

३ कुजे बहुस्त्रीपुरतः कुलघ्नो भानौ कुटुम्बी बहुदारसक्तः।
लग्नस्थिता वित्तकलत्रशत्रुनाथाः सशुक्रा यदि पापयुक्ता॥

**प्रश्नः ५ तृतीयभावविचारः क्रियताम्।**

**प्रश्नः ६ पञ्चमभावविचारः क्रियताम्।**

**प्रश्नः ७ कयोरपि द्वयोः श्लोकयोः व्याख्या कार्या ।**

१ प्राची प्रतीची माहेशी कौबेरी दिक् शुभावहा ।
अवाची राक्षसी दुष्टा शून्याग्नेयी च मारुती ॥

२ पूर्वास्ये धातुचिन्ता स्याज्जीवं दक्षिणे तथा ।
उत्तरास्ये वदेन्मूलं पश्चिमे मिश्रितं फलम् ॥

३ इष्टामङ्कद्विगुणितमेकेन सह संयुतम् ।
त्रिभिश्चैव हरेद् भागं शेषञ्च फलमादिशेत् ॥

**प्रश्नः ८ अष्टविधान् प्रश्नान् विस्तारेण लिखत ।**

**प्रश्नः ९ प्रश्नशास्त्रे प्रश्नविधिं लिखत ।**

**प्रश्नः १० दशानां प्रश्नानामुत्तरं लिखत ।**

१ हृदयं कस्य राशेः अङ्गम् अस्ति ?
२ धातुचिन्ता कस्यां दिशि भवति ?
३ षड्वर्गे एकस्यां होरायां कति अंशाः भवन्ति ?
४ 'अर्कः' इति शब्देन का सङ्ख्या ग्राह्या ?
५ वर्षाऋतोः अधिपतिः ग्रहः कः ?
६ त्रिकोणस्थानानि कानि ?
७ राक्षसी अर्थात् का दिशा ?
८ आयाः कति सन्ति ?
९ कस्मात् भावात् विद्यायाः विचारः क्रियते ?
१० 'खाग्निः' इति शब्देन का सङ्ख्या ग्राह्या ?
११ धातूनां कति प्रकाराः सन्ति ? के च ते ?
१२ मेषराशेः वर्णः कः ?
१३ कतिविधाः प्रश्नाः ? तेषां नामानि लिखत ।
१४ सिंहराश्याधिपतिः ग्रहः कः ?
१५ गजायः शुभः अशुभः वा ?

****